दिनाङ्क :- 02.08.2025

प्रात: - 06:55

## पीएम-किसान पुटकम्

प्रधानमन्त्री नरेन्द्रमोदी अद्य स्वसंसदीयक्षेत्रम् वाराणसी-नगरं गत्वा प्रायः द्वाविंशतिशत-कोटिरूप्यकाणां विकासपरियोजनानां शिलान्यासं उद्घाटनञ्च करिष्यति। अस्मिन् अवसरे सः जनसभाम् अपि सम्बोधयिष्यति। कृषकाणां कल्याणार्थम् ऐतिहासिकं पदक्षेपं स्वीकृत्य, प्रधानमन्त्री वाराणसीतः पि. एम्-किसान् इत्यस्य विंशतितमं पुटकमपि विमोचयिष्यति, यत्र सार्द्धद्विसहस्र- कोटिरूप्यकाणिप्रायः सम्पूर्णदेशस्य पादोनदशकोटि-कृषकाणां कोषेषु प्रत्यक्षरूपेण प्रेषयिष्यन्ते। प्रधानमन्त्री वाराणसी-भदोही-मार्गस्य, चितौनी-शूल्-टङ्केश्वर-मार्गविस्तारस्य उद्घाटनमपि करिष्यति। प्रधानमन्त्री मोदी जलजीवन-मिशन् इत्यस्यान्तर्गतं सप्तचत्वारिंशत् ग्रामीण-पेयजल-योजनानां उद्घाटनम् अपि करिष्यति।

## विदेश मंत्रालय-भारत-अमरीका

विदेशमन्त्रालयः अवदत् यत् भारतस्य रक्षा-आवश्यकतानां स्रोतस्य निर्धारणं केवलं देशस्य राष्ट्रियसुरक्षायाः अनिवार्यताभिः, सामरिकमूल्यांकनेन च भवति। मन्त्रालयस्य प्रवक्ता रणधीर् जैस्वालः नवदेहली-नगरे रक्षा-क्रयणविषये एकस्य प्रश्नस्य प्रत्युत्तरे प्रसारमाध्यमान् सम्बोधयन् एतत् अवदत्। ऊर्जा-स्रोतस्य विषये, प्रवक्ता दृढतया अवोचत् यत् भारतदेशः विपण्यां ये प्रस्तावाः सन्ति., तदनुकूलं वैश्विकपरिस्थित्यानुसारं व्यवहारं विधास्यति।

बाइट- रणधीर जसवाल-अनर्जी स्कोर 13 से.

भारत-रशिया-सम्बन्धविषये प्रश्नस्य प्रत्युत्तरे प्रवक्ता अवदत् यत् विविधदेशैः सह द्विपाक्षिकसम्बन्धाः स्वस्याः योग्यतायाः आधारेण स्थिताः सन्ति, ते च तृतीयदेशस्य चक्षुषा न द्रष्टव्याः।

श्रीजैस्वालः अवधानं दत्तवान् यत्, भारत-अमेरिका-देशयोः समग्र-वैश्विक-सामरिक-सहभागित्वम् अस्ति, यस्य आधारः सहभागी-हितं, लोकतान्त्रिकमूल्यानि, दृढ-प्रतिजन-सम्बन्धश्चास्तीति।

लोकसभा-माध्यम-भारत-पाकः

आपरेशन् सिन्दूर् इत्यस्य समये भारत-पाकिस्तानयोः मध्ये प्रत्यक्षतया सैन्यक्रियाक्रमणं निवारयितुं चर्चा अभवत् इति सर्वकारः दृढीकृतवान्। लोकसभायां लिखिते प्रत्युत्तरे विदेशराज्यमन्त्री कीर्तिवर्धन् सिङ्घः अवदत् यत्, भारत-पाकिस्तान्-देशयोः सशस्त्रसेनायाः मध्ये विद्यमानसम्प्रेषणाधारेण चर्चा अभवदिति। युद्धविरामस्य याचना पाकिस्तानपक्षेन आरब्धा इति सः स्पष्टं कृतवान्। तृतीयपक्षस्य मध्यस्थतायाः विषये मन्त्री अवदत् यत्, भारतम् अमेरिकादेशस्य राष्ट्रपतिना सह सर्वाणि राष्ट्राणि अपि अकरोत् यत् पाकिस्तानेन सह कस्यापि विवादस्य विषये द्विपाक्षिकरूपेण एव चर्चा भविष्यति इति।

वि.मं. आयर्लेण्ड्-देशः

डब्लिन्-नगरस्य भारतीय-दूतावासः आयर्लेण्ड्-देशस्य सर्वानपि भारतीयनागरिकान् स्वकीयसुरक्षायै युक्तियुक्तानि सावधानानि स्वीकर्तुं, विशेषतः विषमसमये निर्जनक्षेत्राणि परिहर्तुं च उपादिशत्। ह्यः प्रस्तुते परामर्शपत्रे दूतावासः अवदत् यत् सद्यः एव आयर्लेण्ड्-देशे भारतीयनागरिकान् विरुध्य शारीरिक-आक्रमणानां प्रकरणानि वर्धितानि सन्तीति। दूतावासः अस्मिन् विषये आयर्लेण्ड्-देशस्य सम्बद्धैः अधिकारिभिः सह सम्पर्कं कुर्वन् अस्ति।

एल. एस.-भारतीय-महासागरीय-प्रदेशः

विदेशराज्यमन्त्री कीर्तिवर्धन् सिङ्घः अवदत् यत् हिन्दमहासागरक्षेत्रस्य देशैः सह भारतस्य राजनैतिकसम्बन्धाः दृढाः सन्ति, व्यापार-निवेश-सम्बन्धाः च वर्धिताः सन्तीति।

महाराष्ट्र-दही-हाण्डी उत्सवः

महाराष्ट्र-सर्वकारेण गोकुलाष्टमीत्यवसरे आगामिनि दहि-हाण्डी-उत्सवे भागं ग्रहीतृभ्यः सार्धैकलक्ष-गोविन्दानाम् आश्वस्ति-रक्षणस्य घोषणा कृता अस्ति। तेषां सुरक्षायै, ओरियण्टल् इन्शुरन्स् कम्पनी इति माध्यमेन आश्वस्तिः प्रदीयते।

क्रिकेट्-इण्ड्-इङ्ग्लेण्ड् निकषः

अद्य लण्डन्-नगरस्य द ओवल्- इत्यत्र एण्डर्सन्-तेण्डुल्कर्-ट्रोफी-क्रीडायाः पञ्चमान्तिमञ्च क्रिकेटनिकष-क्रीडायाः तृतीयदिने आतिथेय-इङ्ग्लेण्ड्-देशं विरुध्य भारतं स्वस्य द्वितीया पारी पुनः आरभते। क्रीडायाः आरम्भः भारतीयसमयानुगुणं सायं 3:30 वादने भविष्यति।